श्री

केनोपनिषत्

(तलवकारोपनिषत्)

[सामवेदशान्तिपाठ = ओं आप्यायन्तु ममाङ्गानि वाक्प्राणश्चक्षुः श्रोत्रमथो बलमिन्द्रियाणि च सर्वाणि। सर्वं ब्रह्मो(ह्मौ)पनिषदम् माऽहं ब्रह्म निराकुर्याम्। मा मा ब्रह्म निराकरोत्। अनिराकरणमस्तु। अनिराकरण मेऽस्तु। तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु। ओं शान्तिश्शान्तिश्शान्तिः॥]

श्री

श्रीमते रङ्गरामानुजस्वामिने नमः

[येनोपनिषदां भाष्यं रामानुजमतानुगम्।

रम्यं कृतं प्रपद्ये तं रङ्गरामानुजं मुनिम्॥]

श्रीरङ्गरामानुजमुनिविरचितं प्रकाशिकाभिधानं भाष्यम्

अतसीगुच्छसच्छायमञ्चितोरस्स्थलं श्रिया।

अञ्जनाचलशृङ्गारमञ्जलिर्मम गाहताम्॥ १॥

॥ श्री ॥

श्रीमद्भ्यो रङ्गरामानुजमहादेशिकेभ्यो नमः।

श्रीवात्स्यवीरराघवाचार्यविरचितः

उपनिषद्भाष्यपरिष्कारः

श्रीरङ्गरामानुजयोगिनर्यान् वेदान्तरामानुजयोगिनश्च।

गुरून् अशेषांश्च रमानिधिञ्च प्रणम्य केनोपनिषत्परोऽस्मि॥

[श्रीमन्निगमान्तमहादेशिकैरीशावास्ये दर्शितां सरणिमनुसरद्भिः श्रीरङ्गरामानुजस्वामिभिः स्वभाष्ये सर्वत्र व्याख्यातत्वानामोपनिषद-

व्यासं लक्ष्मणयोगीन्द्रं प्रणम्यान्यान् गुरूनपि ।
व्याख्यां तलवकारोपनिषदः करवाण्यहम् ॥ २ ॥

चान्यखण्डानां पूर्णानुवादपूर्वकमेव व्याख्यानं कृतं तालकोशेषु स्पष्टं लक्ष्यते । तदनुरोधेन कतिपयोपनिषद्भाष्यमुद्रणञ्च आनन्दाश्रममुद्रालये कृतमस्ति । (तत्र मुद्रिता केनोपनिषत्प्रकाशिका परं न प्रसिद्धरङ्गरामानुजस्वामिविरचितं भाष्यमित्यन्यदेतत् ।) एवंसति आन्ध्राक्षरादिमुद्रितकोशेषु उपनिषद्भागस्य तत्र तत्र भाष्ये क्वचित् प्रतीकरूपेण निवेशः, क्वचिन्मूलभागस्य परित्यागः इत्यादिरीतिरवलम्बिता किं तादृशमातृकोपलम्भेन, किं वा उपनिषदोऽप्युपरि पृथङ्मुद्रणात् पुनर्निवेशो वृथेति स्वयमेव तादृशांशानां निष्कासकल्पनादिति विमृश्यमेतत् । यथातालकोशं मूलवाक्यकृत्स्नानुवादपूर्वकभाष्यपठन एव च भाष्यकृदभिमतपाठादिनिष्कर्षः, पदेपदे मूलग्रन्थावलोकननैरपेक्ष्यम्, अर्थतत्त्वावधारणसौकर्यञ्चेति विचिन्त्यते । अथापि निस्सन्देहस्थले पूर्णमूलपुनर्मुद्रणं विहाय यथार्हं निवेश्यतेऽत्र द्वितीयसंस्करणे । तत्र केनोपनिषद्भाष्यं कोत्तिमङ्गलतालकोशमेव प्रायशोऽनुसृत्य, पाठान्तरञ्च प्रदर्श्य प्रकाश्यते ।]

व्यासम्-वेदान् विभज्य वेदान्तार्थं निर्णीतवन्तं ब्रह्मसूत्रकृतं भगवन्तं बादरायणम् । अन्यान्-श्रीमद्वेदान्तदेशिक-सुदर्शनभट्टार्याभिधानश्रुतप्रकाशिकाचार्यप्रमुखान् । तलवकारोपनिषदः— 'जैमिनितलवकारपर्यायतलवकारोपनिषद्ब्राह्मणान्तर्गतस्य केनेत्यादेरनुवाकस्य' इति उपलभ्यमानरीत्या वक्तव्यं भवति । चतुरध्यायात्मकं जैमिनीयोपनिषद्ब्राह्मणं हि मुद्रितमस्ति । तत्र द्वादशानुवाकात्मनि चतुर्थेऽध्याये अयं दशमोऽनुवाक इति ॥ शाङ्करे तु अयं नवमाध्याय इत्युक्तम् ।

हरि ओम्। केनेषित पतति प्रेषित मन
केन प्राण प्रथम प्रैति युक्त ।
केनेषिता वाचमिमा वदन्ति
चक्षुश्श्रोत्र (त्रे) क उ देवो युनक्ति ॥ १ ॥

---

१ परमात्मस्वरूप प्रश्नप्रतिवचनरूपप्रकारेण (प्रकाररूपेण) प्रकाशयितु प्रस्तौति–'केनेषित पतति प्रेषित मन केन प्राण प्रथम प्रैति युक्त । केनेषिता वाचमिमा वदन्ति चक्षुश्श्रोत्र(त्रे) क उ देवो युनक्ति'। मन केन वा(१) प्रेषित प्रेरित सत् स्वविषये प्रवर्तत इति भाव । इषितम् इष्टं मनम् । प्राणाना मध्ये **प्रथमः प्राणः** मुख्य प्राण केन प्रेरितस्सन् प्रैति प्रकर्षेण सञ्चरति । तथा केन वा प्रेरितामिमा वाच—वागिन्द्रियमवलम्ब्य व्यवहरन्ति लोका ।

मन प्रभृतीनीमानि पञ्च करणान्येव ब्रह्मज्ञानसाधनत्वेन बहुश उपनिषत्सूद्घोषितानि । तदिदम् अस्मद्विरचिते वेदान्तपुष्पाञ्जलौ व्यक्तम्। ऐतरेयारण्यके च स्पष्टमेतत्, (१) 'स एष गिरिश्चक्षुश्श्रोत्र मनो वाक् प्राण । त ब्रह्मगिरिरित्याचक्षते' इति । अत इहापि पञ्चानामेव ग्रहणम् । तत्तेषा ब्रह्मणि यथावत् प्रवृत्तिमपश्यन्, कृत्स्नब्रह्मज्ञान विना च अमृतत्व न भवतीति मन्वान तदर्थं तत्प्रेरकदेवप्रसादेन तेषा वशीकरणमिच्छन् शिष्य पृच्छति केनेति ॥

इषित पततीति पतते सकर्मकत्व द्वितीयाश्रितातीतपतिते त्यादिपाणिनिसूत्रसूचितमेव । प्रेषितमिति पदस्सद्भावात् इषितमित्यस्य पुनरुक्तता मा भूदिति इष्टमित्यर्थस्वीकारेऽपि इषितामित्यस्य प्रेत्युपसर्गं विनाऽपि प्रेषितामित्यर्थ अवश्यापेक्षितत्वात् स्वीकृत – प्रैतीत्यत्र प्रत्युपसर्ग (२) प्रयायेति वक्ष्यमाणस्य … म वा व्याचष्टे प्रकर्षेण सञ्चरतीति । व्यवहरन्तीति । अविरोधात् व्यवहर्तव्य सर्व

श्रोत्रस्य श्रोत्र मनसो मनो यद्
वाचो ह वाच स उ प्राणस्य प्राण ।

तथा चक्षुश्श्रोत्रयोश्च क प्रेरक । अचेतनानामेषा चेतनाप्रेरिताना कार्यकरत्वासभवात्—इति गुरुमुपेत्य शिष्य पप्रच्छेत्यर्थ ॥ (1)

२ गुरु प्रतिवक्ति—श्रोत्रस्य श्रोत्र भवन्ति । चक्षुरादीना

कर्म । वाचमिति तु प्रसिद्धकरणपञ्चकान्तर्गतवागिन्द्रियपरम् । इमाम्-प्रकृतप्रश्नवाक्यादिकरणभूतवाग्जातीयाम् । चक्षु श्रोत्रयो रिति द्विवचन गोळकादिरूपावयवात्मकप्राण्यङ्गातिरिक्ताऽऽहङ्कारिकेन्द्रियविवक्षणात् समाहारो न कर्तव्य इत्याशयेन स्यात् । एवञ्च मूले चक्षु श्रोत्रमिति पाठे नैक पदम् । समाहारविवक्षया वा स्यात् ऐकपद्यम् ॥

प्रतिवर्तते इति । सपूर्णब्रह्मविज्ञानाय हि श्रोत्रादिवशीकरण त्वदिष्टम् । न श्रोत्रादीना तथा ब्रह्मग्रहणसामर्थ्यमस्ति । एव तेषाम सामर्थ्यादेव प्रत्येक तत्तदधिष्ठातृभिदेवान्तरैरप्यत्र साध्य न किञ्चि दस्ति । तर्हि कृत्स्नज्ञानाभावे कथममृतत्वमिति न मेतव्यम् । एभि करणैर्दुर्ग्रहमिदमित्येव ज्ञानत एवामृतत्वसभवात् । देवमनुष्यादीना सर्वेषामप्यत्र अकृत्स्नज्ञत्वस्याविशिष्टत्वादिति प्रतिवर्तते इति निष्कर्ष । श्रवणमननप्रवचन [प्राणायामसाध्य] ध्यानदर्शनाना क्रमभावित्वात् गुरुणा श्रोत्रादीना क्रमेणोक्ति । पूर्व शिष्यादत्तनमस्तु 'किमु त्तरोत्तरकार्यसाधनदर्शनाप्रयासेन, पूर्वपूर्वसाधनस्यैवाशक्यत्वात् । ग्रन्थादर्थश्रवणोपयोगि चक्षुश्श्रोत्रमपि खलु न वशेऽस्ति इति दर्शयितुम् ॥ श्रोत्रादिप्रेरक क इति प्रश्न श्रोत्रादिप्रेरको यस्स इति-समाधानायोगात् श्रोत्रस्य श्रोत्रमित्यादिक न श्रोत्रादिप्रवृत्ति निर्वाहकपरम् , किन्तु 'यथा शब्दादीना विषयाणा ग्राहक श्रोत्रादिक तद्ग्राहकमेव, न तु तद्ग्राह्यमपि, तथा श्रोत्रादिक प्रति श्रोत्रा-

चक्षुषश्चक्षुरतिमुच्य धीरा
प्रेत्यास्माल्लोकादमृता भवन्ति ॥ २ ॥

प्रकाशक चक्षुरायनधीनप्रकाशम् अप्राणाधीनप्राणनश्च यत् स उ-स एव-इत्येवम् अतिमुच्य ज्ञात्वा अस्माल्लोकात् अर्चिरादिना मार्गेण गत्वा मुक्ता भवन्तीत्यर्थ ॥ (2)

दिभूत ब्रह्म श्रोत्रादिग्रहसाधनमेव न तु श्रोत्रादिग्राह्यमपि' इत्यर्थपरमित्याशयेनाह चक्षुरादीना प्रकाशकमित्यादि । उपरितन मन्त्राणा पर्यालोचनया अयमर्थो विवक्षितो गम्यत इति भाव । वाचमिति यथाशाङ्कर व्यत्ययेन प्रथमान्तमभिप्रेतम् , अन्येषा प्राणवत् प्रथमान्तत्वात् । स एवेति । चक्षुरादीना स्वरूपस्थिति हेतुस्तत्स्वरूपश्च य स एव तत्प्रवृत्तिहेतुरपि न पुनरग्न्यादित्यादीनि अधिष्ठातृदेवतान्तराणीति भाव । एतावता को युनक्तीति प्रश्ने, स एव एव चक्षु श्रोत्रादि सर्वं युनक्तीति समाधिरुक्त । अन्तिमप्रश्नवाक्यानुसारेण सौकर्यात् स इति प्रथमान्ततया निर्देश । अतिमुच्येत्यत प्राक् इतिशब्दोऽध्याहार्य । एवं तद्वेदनस्य नियन्त्रवे तस्याविज्ञेयत्वाद् दुर्लभममृतत्वमिति शङ्का परिहर्तुम् अतिमुच्येत्यादि मूलम् उक्ताशोपासनमेव पर्याममिति तदाशय इति प्रकरणाभिप्रायाह इत्येवमिति । आमुच्य प्रतिमुच्येत्यादावित्र उपसर्गबलेन धातो सदर्थानुगुणार्थवर्णन युक्तमित्याशयेन अति मुच्येत्यस्य ज्ञात्वेत्यर्थ उक्त । मोचनातिक्रमण हि ग्रहणमेव । यदि तु पूर्णज्ञानायोगप्रतिपादनाय अतिमुच्येत्यस्य अधिकाराविमोकेनेत्यर्थ एवेष्यते तर्हि ज्ञात्वेति न तदर्थ किन्तु धीरपदविवक्षितार्थ । अतिमुच्य धीरा इत्यस्य अधिकाराविमोकेन अपेक्षिताशङ्कानिरा इत्यर्थ इति भावो वर्णनीय ।

न तत्र चक्षुर्गच्छति न वाग् गच्छति नो मनः ।
न विद्मो न विजानीमो यथैतदनुशिष्यात् ॥ ३ ॥

३. तदेव प्रपञ्चयति—**न तत्र चक्षुर्गच्छति न वाग् गच्छति नो मनः** ॥ तत् किमुपदेष्टव्य(तर्हि तत् कथमुपदेष्टव्य)मित्यत्राह—**न विद्मो न विजानीमः त(?)थैतदनुशिष्यात्**—किं तदिति पृष्ट आचार्यः, 'नान्तरिन्द्रियेण न बहिरिन्द्रियेण च ज्ञेयं तत्' इत्येव तदुपदिशेत् ॥

४. *ननु तस्य सर्वात्मना ज्ञानाविषयत्वे तुच्छत्वं स्यात्;*

---

३. ननु उत्तरखण्डे 'नाहं मन्ये' इत्यादिमन्त्रद्वयेन श्रवणमनननिदिध्यासनाविषयत्वकथनात् तद्वदिहापि 'नो मन' इति मननाविषयत्वम् 'न विद्मो न विजानीमः' इति श्रवणनिदिध्यासनाविषयत्वञ्च कथितमस्तु । किञ्चोक्तानां पञ्चानां करणानां मध्ये चक्षुरादित्रयस्य पूर्वार्धोक्ततया विद्म इति श्रोत्रजज्ञानं, विजानीम इति प्राणायामाङ्गकध्यानं च विवक्षितुमर्हम् । श्रवणमननाद्यविषयत्वञ्च अपरिच्छिन्नत्वात् । इदमेव च अन्यदेवेत्यादिना उपरि विवियते । अतः किमिति 'नान्तरिन्द्रियेण न बहिरिन्द्रियेण' इत्यर्थवर्णनमिति चेन्—उच्यते । नात्र प्रत्यक्षमात्राविषयत्वमुच्यते । किन्तु सर्वज्ञानाविषयत्वमेवेत्युत्तरमन्त्रावतरणे व्यक्तम् । तत्र 'न श्रोत्रं न प्राणः' इत्यनुक्त्वा न विद्म इत्यादिभङ्ग्यन्तरादरणात् अन्तरिन्द्रियमात्र्यमननध्यानादिकं बहिरिन्द्रियसाध्यज्ञानञ्चात्र इन्द्रियप्रस्तावे विभज्य क्रोडीकृतं स्यादित्याशयादेवं व्याख्यानमिति ॥ यथेत्यनेन, न विद्म इत्याद्युक्तवेदनाद्यविषयत्वरूपप्रकार उच्यते । तादृशप्रकारवत्तया ब्रह्म उपदिशेदिति । तथेति भाष्यदर्शान्यथोपनिषत्पाठसत्त्वे तु सोऽर्थः स्पष्ट एव ॥

अन्यदेव तद्विदितादथो अविदितादधि ।
इति शुश्रुम पूर्वेषां ये नस्तद्व्याचचक्षिरे ॥ ४ ॥
यद्वाचाऽनभ्युदितं येन वागभ्युद्यते ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ ५ ॥

ब्रह्मजिज्ञासया गुरूपसदनादिकञ्च न स्यादित्यत्राह—'अन्यदेव तत् विदितादथो...तद्व्याचचक्षिरे' । ये अस्माकं पूर्वे गुरव, ब्रह्मोपादिशन् तेषाम्, 'सर्वात्मना विदितादपि विलक्षणं सर्वात्मना अविदितादपि विलक्षणमेवंरूपं ब्रह्म' इतीदृशीं वाचं वयं श्रुतवन्त इत्यर्थः ॥ (4)

५-९. एतदेव प्रपञ्चयति—'यद् वाचाऽनभ्युदितं .. नेदं यदिदमुपासते' । वागादिभिर्यदप्रकाश्यं स्वयं वागादीन्द्रियप्रकाशकञ्च,' तदेव ब्रह्मेति जानीहि । यद्वस्तु इदमिति इदङ्कारगोचरतया हस्तामलकवत् सुविदिततयोपासते जना , तद् ब्रह्म नेत्यर्थ । एवमुत्तरत्रापि ॥ 'यच्चक्षुषा

५.९. यद्वास्त्वित्यादि । श्रुतप्रकाशिकायां जिज्ञासाधिकरणे, "नेदं यदिदमुपासत इत्यस्यायमर्थः—यदिदं प्रतीकमुपासते, तन्न । तदेव परं ब्रह्म त्वमुपास्स्व" इति वर्णितोऽर्थः इह विवक्षित इति भाव्यम् । समन्वयाधिकरणे च भाषितम्, "नात्र ब्रह्मण उपास्यत्वं प्रतिषिध्यते । अपितु ब्रह्मणो जगद्वैरूप्यं प्रतिपाद्यते" इति । तत्र च श्रुतप्रकाशिका, "यदिदमुपासत इत्यत्रेदमंशे निषेधस्य तात्पर्यम्" इति । तर्हि उपासत इति वाक्यानि किमर्थानीति चेत्—तेन वागादीनामुपासनोपयोगितया प्रश्न इति व्यज्यते । अयमाशयः—अर्थान्तराणामिव ब्रह्मणोऽपि कात्स्न्र्येनोपासनं वागादिवशीकारे सुकरमिति हि तदधिष्ठातृदेवताप्रश्नः शिष्येण कृत । तत्रैवं गुरुरुपदिशति, 'वागादिसम्यग्वशीकरेण संपूर्णतच्छक्त्युपयोजनेनोपा-

यन्मनसा न मनुते येनाहुर्मनो मतम्।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ ६ ॥
यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यति।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ ७ ॥
यच्छ्रोत्रेण न शृणोति येन श्रोत्रमिदं श्रुतम्।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ ८ ॥
यत् प्राणेन न प्राणिति येन प्राणः प्रणीयते।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ ९ ॥

इति प्रथमः खण्डः

न पश्यति येन' चक्षूंषि पश्यति'। येन परमात्मना साधनेन पुमान् इतरत् पश्यतीत्यर्थ ॥ 'यत् प्राणेन प्राणिति येन प्राण प्रणीयते'। प्रणीयते—प्राणितीत्यर्थ ॥ इति प्रथम खण्ड ।

स्यमानं कार्त्स्न्येन यद्भवति तद्विलक्षणमिदं ब्रह्म, स्वयं वागादिप्रकाशकत्वात् यथावत्तदप्रकाश्यत्वात् इति। वागादीन्द्रियप्रकाशकञ्चेति। वागिन्द्रियादिसर्वप्रकाशकश्चेत्यर्थः। अभ्युद्यते—प्रोच्यते। अत्र येनेति न कर्तरि तृतीया, किन्तु येन चक्षूंषि पश्यतीत्यादाविव करणे हेतौ वा। चक्षूंषीति गोलकाभिप्रायम्। योगबलाद्वा इन्द्रियप्रदर्शनम्। दृष्टव्यसर्वोपलक्षणमिदम्। पश्यति पश्यन्तीत्यर्थ इति क्वचित् पाठः। अन्यच्च दृश्यन्त इत्यर्थ इति। श्रुतम् शब्दबोधविषयः। प्रणीयत इत्यस्य प्रणीतमिति व्याख्यानमुद्रणमशुद्धम्। 'अभ्युद्यते' 'पश्यती'ति वर्तमानकालस्यापि पूर्वं श्रवणेन भूतकालविवक्षाया अनावश्यकत्वात्। पुल्लिङ्गप्राणशब्दं प्रति प्रणीतमिति विशेषणायोगाच्च। किन्तु पूर्वं वागादिपदव्युत्पत्तिपर्यालोचनया 'उदितं, दृश्यते, मनुते, मतम्' इत्यादिप्रयोगात् इहापि प्रयुक्तम्—अन्यधात्वर्थ एव विवक्षित इति, 'प्राण्यत' इति स्यादित्यालोचितम्। तत्र प्राणितीति पाठो लभ्य एवेति स एव साधिष्ठः॥

**यदि मन्यसे सुवेदेति दभ्रमेवापि नूनं त्वं वेत्थ ब्रह्मणो रूपम्।
यदस्य त्वं यदस्य देवेषु अथ नु मीमांस्यमेव ते मन्ये विदितम्॥ १**

---

२. १ शिष्य प्रत्याह—'यदि मन्यसे सुवेदेति...अथ नु मीमांस्यमेव ते'। अहं ब्रह्मस्वरूपं सुष्ठु वेदेति यदि मन्यसे, न तत् तथा। अस्य ब्रह्मण इह लोके यदपि रूपं त्वं वेत्थ, तन्नूनं **दभ्रमेव** अल्पमेव। देवेषु यद्रूपं त्वं वेत्थ, तदपि **दभ्रमेव**-अल्पमेव। त्वया ज्ञातं सर्वं ब्रह्मणो रूपमल्पमेव। न सर्वं ब्रह्मरूपं त्वया ज्ञातम्। अतः परमेव ते ब्रह्म विचार्यम्; नातः पूर्वं सम्यग्विचारितमित्यर्थं एतद्वाक्यं श्रुत्वा सम्यग्विचार्य शिष्य आह 'मन्ये विदितम्'। अहं विदितमेव मन्ये॥

---

२. १. यदपीति। प्रथमं यदिति, उत्तरवाक्ये यदपीति च युक्तम्—अथापि मूले अपिशब्दस्य प्रथमवाक्य एव सत्त्वात् तथोक्तिः। मन्येऽविदितमिति ब्राह्मणमुद्रणे कृतः अकारप्रश्लेषः, उपरि, 'स्वर्गे लोकेऽज्येये' इति तत्कृताकारप्रश्लेषवत् सर्वव्याख्यानानारूढः। तत्र अज्येये इति पाठस्वीकारे स्वापेक्षया ज्येयोरहिते सर्वज्येष्ठे अनुत्तमे इत्यर्थो भाव्यः।

शिष्य आहेति। किमर्थमेवम्? सर्वमपि गुरुवाक्यमेवास्तु। 'नाहं मन्ये सुवेद' इति मन्त्रोऽपि शिष्यं प्रति गुरुणा स्वस्थिति-प्रदर्शनार्थं इत्युक्तिसंभवात्; यथा आनन्दाश्रममुद्रितव्याख्याने। यद्वा गुरुवाक्यरूपप्रथमश्लोकान्तर्गतः 'मन्ये विदितम्' इति भागोऽपि परं गुरुवाक्यमेवास्तु; उपरि तु शिष्यवाक्यमिति; यथा परमार्थ-प्रकाशिकायामस्माभिरेवोक्तमिति यद्यपि स्यात्—अथापि, 'यदि मन्यसे सुवेदेति,' नाहं मन्ये सुवेद' इति च सन्दर्भे परिशील्यमाने उक्तिप्रत्युक्तिरूपता स्वरसा। एवं च तद्वत् उत्तमपुरुषघटितत्वात् 'मन्ये विदितम्' इति भागोऽपि शिष्यकर्तृक एवोचित इत्याशयेन

नाहं मन्ये सुवेदेति नो न वेदेति वेद च ।
यो नस्तद्वेद तद्वेद नो न वेदेति वेद च ॥ २ ॥
यस्यामतं तस्य मतं मतं यस्य न वेद सः ।
अविज्ञातं विजानतां विज्ञातमविजानताम् ॥ ३ ॥

---

२. २. कथमित्यत्राह—**नाहं मन्ये सुवेदेति नो न वेदेति वेद च** । अहं सम्यग्वेदेत्यपि न मन्ये ; न वेदेत्यपि न । अपितु वेदैव । ततश्च कार्त्स्न्येन ज्ञातत्वमज्ञातत्वञ्च नास्ति ; किञ्चित् ज्ञातत्वमस्तीत्यर्थः । 'यो नस्तद्वेद तद्वेद नो न वेदेति वेद च' नः अस्माकं ब्रह्मचारिणां मध्ये तत् 'नो न वेदेति वेद च' इति निर्दिष्टं तत् अर्थतत्त्वं यो वेद, स तद् ब्रह्म वेदेत्यर्थः ।

२. ३. '*यस्यामतं तस्य मतं मतं यस्य न वेद सः*' । यः (यस्तु) परिच्छिन्नत्वेन ब्रह्म न मनुते, स ब्रह्म मनुते । यस्तु परिच्छिन्नत्वेन ब्रह्म मनुते, स तु न जानातीत्यर्थः । '*अविज्ञातं विजानतां विज्ञातमविजानताम्*' । ब्रह्म एतावदिति परिच्छेदज्ञानवतां ब्रह्माविज्ञातं भवति ।

यथाशाङ्करभाष्ये । एवमपि यस्यामतमित्यादिकं शाङ्करोक्तरीत्या श्रुतिस्वतन्त्रवचनमेव वाऽस्तु; मध्ये संवादविच्छेदे मानाभावात् गुरुवाक्यमेव वा । यस्यामतमिति मन्त्रमात्रमपि वा शिष्यवाक्यमस्त्विति तत्रानिर्भरं व्यङ्क्तुं यस्यामतमित्यत्र श्रुतिराहेत्यादिकं नोक्तम् ॥

२. २. नाहमिति मन्त्रस्य एवमप्यर्थः संभवति 'अहं सुवेदेति न मन्ये; न वेदेति चाहं नो वेद । अस्माकं मध्ये यः तद्वेद—ब्रह्म वेद, सः तद्वेद—सुवेदेत्येवं न वेद्यमित्येतत् वेद ; न वेदेति च स नो वेद' इति । एवंच मन्ये विदितमित्युक्तं पूर्वार्धेन विवृतम् ; यो नस्तद्वेदेति तदेव विदितत्वमन्यनिष्ठतया उक्त्वा उपरितनांशेन पूर्वार्धवत् विवृतमिति बोध्यम् । एवं प्रकारान्तराण्यपि संभा-

प्रतिबोधविदितममृत (विदित मत) ममृतत्व हि विन्दते ।

परिच्छिन्नत्वज्ञानशून्याना ब्रह्म विज्ञात मतमित्यर्थ । उक्तञ्च भगवता **भाष्यकृता**—"यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' इति ब्रह्मणोऽनन्तस्य [1]अपरिमितगुणस्य वाङ्मनसयोरेतावदिति परिच्छेदायोग्यत्वश्रवणेन नैवैतावदिति ब्रह्मपरिच्छेदज्ञानवता ब्रह्म अविज्ञातम् अमतमित्युक्तम्, अपरिच्छिन्नत्वाद् ब्रह्मण । अन्यथा, 'यस्यामत तस्य मतम्', 'विज्ञातमविजानताम्' इति तत्रैव मतत्वविज्ञातत्ववचन विरुद्धयेत" इति । ततश्चाविज्ञातत्वादिवचन कार्त्स्न्येन ज्ञानाविषयत्वपरम्, न तु सर्वात्मना ब्रह्मण ज्ञानागोचरत्वपरमिति द्रष्टव्यम् । तथा हि सति, 'ब्रह्मविदाप्नोति परम्,' 'तमेव विदित्वाऽति मृत्युमेति' इत्यादिशास्त्राणामसङ्गतार्थकत्वप्रसङ्गात्, वेदान्ताना नैरर्थक्यप्रसङ्गाच्च । (२)

२ ४ 'प्रतिबोधविदितममृतममृतत्व हि विन्दते' । प्रतिनियतो बोध **प्रतिबोधः** । सत्यत्वज्ञानत्वानन्तत्वादिरूपासाधारणधर्मविशिष्टतया ज्ञातम् अमृत ब्रह्मस्वरूप तत्क्रतुन्यायेन स्वोपासकस्याप्यमृतत्व विन्दते

विताति । अथापि सभावितप्रकारेषु शाङ्करप्रकारोऽप्यस्तु नाम मिति अनतिभेदेन स एव दर्शित ॥

२. ३ विजानतामिति । परिच्छिन्नत्वेन ध्यायतामित्यर्थ ॥

२ ४ प्रतिबोधेत्यादि । उपनिषत्सु यथेच्छ पदच्छेददर्शनात् पदाध्याहारगौरवपरिहाराय प्रतिबोधवित्—प्रतिनियतबोधवित् 'प्रतिबुद्धा न सेवन्ते' इति प्रसिद्धमव्यभिचारि भक्तिरूप ज्ञान नच द्विधाव्यवस्थितमात्रविषयमौपदेशिक बोध वा प्राप्त, इतन्यूनत्वज्ञानं विना एवमेव पूर्वं प्राप्त, मतम्—अभिमतममृतत्व विन्दते । तत्र न

1 श्रीभाष्ये अपरिच्छिन्नेनिमन् अपरिमितेत्यपि तत्र पाठ ।

आत्मना विन्दते वीर्यं विद्यया विन्दतेऽमृतम् ॥ ४ ॥
इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टिः ।

लम्भयतीत्यर्थः । अन्तर्भावितण्यर्थोऽत्र विदिधातुः । लम्भनप्रकारमेवाह 'आत्मना विन्दते वीर्यं विद्यया विन्दतेऽमृतम्'। 'स नो देव शुभया स्मृत्या संयुनक्तु' इत्युक्तरीत्या विद्यानिष्पत्त्यनुकूलं वीर्यं प्रसन्नेन परमात्मना लभते । प्रसन्नपरमात्माऽऽहितवीर्यार्जितया विद्यया अमृतत्वमश्नुत इत्यर्थः ॥ (4)

२. ५. तादृशब्रह्मज्ञाने त्वरामुत्पादयति, 'इह चेदवेदीदथ सत्यमस्ति; न चेदिहावेदीत्, महती विनष्टिः'। इहैव जन्मनि ब्रह्म ज्ञातवांश्चेत्, अथ–समनन्तरमेव अस्ति-सन् भवति। सत्य(ब्रह्म?) ज्ञानाभावे आत्मनोऽसत्ता भवति; 'असन्नेव स भवति असद् ब्रह्मेति वेद चेत् । अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुः' इति श्रुत्यनुरोधादिति द्रष्टव्यम् । 'भूतेषुभूतेषु विचित्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति'। भूतेषुभूतेषु सर्वभूतस्थं परमात्मानं प्रज्ञाशालिनः स्वेतरसमस्तविलक्षणत्वेन

वाक्यार्थबोधमात्रम् अलम्, किन्तु भक्तिरूपापन्नविद्यापर्यन्तमानस्यकमित्युत्तरार्धेनोच्यत इति व्याख्याऽपि संभवेत् । परंतु 'प्रतिबोधविदितममृतम्' इति भाष्यसंमतः पाठः । न तु प्रतिबोधविदितं मतमिति। मतशब्दाव्याख्यानात्; अमृतमिति तात्कोशे मर्तृकोपलम्भात् अमृतं ब्रह्मस्वरूपं तत्प्रत्युपायेनेत्यादिव्याख्यानाच्च । न च अप्रसिद्ध एवं पाठ इति वाच्यम्–उपरि, 'न चैनदुपसर्पति' इति पाठेऽप्येवमा-[illegible]यास्तुल्यत्वात्। यथावदध्ययनपारम्पर्यविच्छेदात् तत्र पाठविषये प्रागेव विवादः स्थितस्यादिति चेत्—तुल्यमिहापि ॥ (4)

भूतेषुभूतेषु विचित्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति॥५॥

इति द्वितीयः खण्डः

ब्रह्म ह देवेभ्यो विजिग्ये। तस्य ह ब्रह्मणो विजये देवा अमहीयन्त। त ऐक्षन्त, अस्माकमेवायं विजयोऽस्माकमेवायं महिमेति ॥ १ ॥ तद्धैषां विजज्ञौ। तेभ्यो ह प्रादुर्बभूव। तन्न व्यजानत(न्त) किमिदं यक्षमिति ॥ २ ॥

निर्गार्य अस्माल्लोकादर्चिरादिमार्गेण परमात्मानं प्राप्य मुक्ता भवन्तीत्यर्थः॥

३. १-२. आत्मना विन्दते वीर्यमित्युक्तार्थे आख्यायिकामाह, 'ब्रह्म ह देवेभ्यो विजिग्ये'। परमात्मा देवानामनुग्रहार्थमसुरादीन् शत्रून् विजितवान्। 'तस्य ह ब्रह्मणो विजये देवा अमहीयन्त'। ब्रह्मकर्तृकविजये सति देवा पूजिता अभवन्। 'त ऐक्षन्त अस्माकमेवायं विजयोऽस्माकमेवायं महिमेति'। देवाः, अयमसुरविजयोऽस्मत्कर्तृक एव, तदनुकूलसामर्थ्यादिकमप्यस्मदीयमेव' इत्यमन्यन्त। 'तद्धैषां विजज्ञौ'।

---

२. ५. 'इह चेदशकत् बोद्धुं प्राक् शरीरस्य विस्रसः। ततः सर्गेषु लोकेषु शरीरत्वाय कल्पते' (कठ-६) इति मन्त्रः, (६. ४-१४) 'इहैव सन्तोऽथ विद्मस्तत् वयं न चेदवेदिर्महती विनष्टिः' इति मन्त्रश्चानुसंधेयौ। (2. ५.)

३. १. ननु तत्तदिन्द्रियाधिष्ठातृदेवताप्रसादेनाभिमतं सेत्स्यतीति शङ्कायाम्, तासामपि सर्वथा ह्यपीकेशाधीनत्वमाख्यायिकया दर्शयति ब्रह्म हेत्यादिना। सूत्रितञ्च, 'ज्योतिराद्यधिष्ठानं तु तदामननात् प्राणवता शब्दात्' इति। ऐक्षन्तेति। अत्र शाट्यम् 'असुरान् जित्वा जगदार्तीन् ईश्वरस्सेतुभेत्तॄन्, देवेभ्यो जयं तत्फलञ्च प्रायच्छत् जगतः सीम्ने। सर्वेशात्तैः जगतः स्थिति चिकीर्षोरयं जयो महिमा चेत्यजानन्तस्ते देवा ऐक्षन्त' इति॥ यक्षमिति। पूज्यमित्यर्थः॥

तेऽग्निमब्रुवन्, जातवेदः ! एतद्विजानीहि किमेतद्यक्षमिति । तथेति ॥ ३ ॥ तदभ्यद्रवत् ॥ तमभ्यवदत् कोऽसीति ॥ अग्निर्वा अहमस्मीत्यब्रवीत्, जातवेदा वा अहमस्मीति ॥ ४ ॥ तस्मिंस्त्वयि किं वीर्यमिति ॥ अपीदं सर्वं दहेयम् यदिदं पृथिव्यामिति ॥ ५ ॥ तस्मै तृणं निदधौ, एतद्दहेति । तदुपप्रेयाय सर्वजवेन । तन्न शशाक दग्धुम् । स तत एव निववृते, नैत(नैन)दशकं विज्ञातुम्, यदेतद्यक्षमिति ॥ ६ ॥

अथ वायुमब्रुवन्, वायो एतद्विजानीहि किमेतद्यक्षमिति ॥ तथेति ॥ ७ ॥ तदभ्यद्रवत् ॥ तमभ्यवदत्, कोसीति ॥ वायुर्वा अहमस्मीत्यब्रवीत्, मातरिश्वा वा अहमस्मीति ॥ ८ ॥ तस्मिंस्त्वयि किं वीर्यमिति ॥ अपीद सर्वमाददीय(यं), यदिद पृथिव्यामिति ॥ ९ ॥

तादृश तेषामभिमान परमात्मा ज्ञातवानित्यर्थ । 'तेभ्यो ह प्रादुर्बभूव' । तेषा देवानामनुग्रहार्थं तत् ब्रह्म यक्षरूपं प्रादुर्भूतम् । 'तन्न व्यजानत किमिदं यक्षमिति' । एतत् यक्षस्वरूपं किमिति ते देवा न व्यजानत- न ज्ञातवन्त इत्यर्थ (२)

३. ३-१०. 'तेऽग्निमब्रुवन् . किमेतद्यक्षमिति' । जातवेदः एतद्विजानीहि किमेतद्यक्षमितीत्युक्तवन्त । 'तथेति तदभ्यद्रवत्... . . जातवेदा वा अहमस्मीति' । तथेति स यक्षसमीपं गत तेन कोऽसीति पृष्ट, अग्नि जातवेदा ' इति प्रसिद्ध नामद्वयमुक्तवानित्यर्थ । 'तस्मिंस्त्वयि किं वीर्यमिति । अपीद सर्वं दहेय यदिद पृथिव्यामिति' । तव क सामर्थ्यमस्तीति यक्षेण पृष्टोऽग्नि पृथिव्यन्तर्गतसकलदाहसामर्थ्य- मस्तीत्युक्तवान् । 'तस्मै स तत एव निववृते' । तर्हीद तृण ... यक्षेणोक्त सर्वेण जवेन तत्समीपं गत दग्धुमसमर्थो निवृत्त

तस्मिं तृण निदधौ, एतद्दहस्वेति । तदुपप्रेयाय सर्वजवेन । तन्न शशाकाऽऽदातुम् । स तत एव निववृते, नैत (नैन)दशक विज्ञातुम्, यदेतद्यक्षमिति ॥ १० ॥

अथेन्द्रमब्रुवन्, मघवन्नेतद्विजानीहि किमेतद्यक्षमिति ॥ तथेति तदभ्यद्रवत् ॥ तस्मात् तिरोदधे ॥ ११ ॥ स(?) तस्मिन्नेवाकाशे स्त्रियमाजगाम बहुशोभमानामुमां हैमवतीम् ॥ ता होवाच किमे-तद्यक्षमिति ॥ १२ ॥ इति तृतीय खण्ड

इत्यर्थ । उपप्रेयाय समीप गत इत्यर्थ । 'नैतदशक विज्ञातु यदेतद् यक्षमिति'। एवं देवान् प्रति उक्तवानिति शेष । एवमुत्तरत्रापि ।

३. ११-१२ 'तस्मात्तिरोदधे'। तस्मात् मघोनस्सन्निधे, एतस्य गर्वभङ्गो मा भूदिति तिरोहितमभवदित्यर्थ । 'तस्मिन्नेवाकाशे स्त्रियमाजगाम बहुशोभमानामुमां हैमवतीम् । ता होवाच किमेतद्यक्ष मिति'। तस्मिन्नेव प्रदेशे हिमवत्पुत्री बहुभिराभरणैश्शोभमाना पार्वती सर्वज्ञामिन्द्रानुग्रहाय प्रादुर्भूता दृष्ट्वा तत्समीपमागत्य, इय सर्वं जाना-तीति मन्यमान किमेतत् यक्षमिति पप्रच्छेत्यर्थ ॥ इति तृतीय खण्ड ।

तिरोदध इति । अग्निवाय्वोरिवेन्द्रे व्यवस्थितत्वायविशेषस्य दुर्वचतया, न प्रति, त्वयि कि वीर्यमिति प्रश्ने उत्तरमप्युचितमपि न प्रयादिति तमपृष्ट्वैव तिरोदधे । अन्यथा ह्यस्याधिक्ये गर्वभङ्गस्या-द्विति च ॥ तस्मिन्नेवेति । कथमपि तद्यक्ष विज्ञातव्यमिति श्रद्धया तस्य तत्रैव स्थितत्वादिति भाव । बहुशोभमानामित्यस्य बहुषु मध्ये शोभमानामिति निर्धारणे समासो न स्यात् । अतो बहुभिश्शोभ मानामित्याह । बहु इति क्रियाविशेषण पृथक्पदमिव शुद्धित ब्राह्मणे । हैमवतीमित्यस्य हेममयाभरणवतीमित्यर्थान्तरमपि शाङ्करे । उमाम्-

[सा] ब्रह्मेति होवाच, ब्रह्मणो वा एतद्विजये महीयध्वम (ध्वे) इति । ततो हैव विदाञ्चकार ब्रह्मेति ॥ १ ॥ तस्माद्वा एते देवा अतितरामिवान्यान् देवान्, यदग्निर्वायुरिन्द्रः । ते ह्येन-

---

४. १. 'ब्रह्मेति होवाच ब्रह्मणो वा एतद्विजये महीयध्वमिति'। ब्रह्मैव यक्षरूपेण युष्मन्मोहशमनाय प्रादुर्भूतम् । अतो ब्रह्मसंबन्धिनि विजये निमित्ते पूजां प्राप्नुत । अस्माभिरेव विजयः कृत इति दुरभिमानस्त्यक्तव्य इत्यर्थः । 'ततो हैव विदाञ्चकार ब्रह्मेति'। तदुपदेशादेव ब्रह्मेति ज्ञातवानित्यर्थः ।

४. २-३. 'तस्माद्वा एते देवा अतितरामिवान्यान् देवान्,

उमारूपेणाविर्भूतां विद्यामिति च तत्र । एवम् उमामित्यत्रापि उ इति पृथक्पदमिति वा एकपदत्वेऽपि उकारवाच्यां मां लक्ष्मीमिति वाऽर्थ इह कल्प्येत ; लक्ष्म्या इन्द्रं प्रति उपदेशस्य भारते लक्ष्मीतन्त्रे च दर्शनात्—अथापि लक्ष्म्या अपि यक्षरूपेऽन्तर्भाव इति, पार्वतीमुखेनेन्द्रस्य शिक्षणं समुचिततममिति च स्फुटप्रतिपन्नत्वाच्च अयमर्थ एवादृतः । अपरिचितलक्ष्मीदर्शने च यक्षस्यैवेदं रूपान्तरमिति मतिरस्य स्यात् ॥ (12)

४. १. पूर्ववाक्ये स इति, अत्र वाक्ये सा इति च पदं भाष्ये न व्याख्यातम्, नापि गृहीतम् । तत्र सा इति पदं विनैव अनेकं मुद्रणमप्युपनिषदो दृश्यते । अत इति । एवमनुकूलब्रह्मसद्भावादित्यर्थः ॥ प्राप्नुतेति लोटि मध्यमपुरुषबहुवचनम् । अतो मूले अमहीयध्वमिति पदच्छेदो भाव्यः । देवा अमहीयन्तेति पूर्वं प्रयोगात् । औचित्याच्च । प्राप्नुथेति लडन्तरूपं क्वाचित्के । 'महीयध्वे' इति ... [illegible] ...क्षणमुद्रणरीत्यनुसरणे तद् युक्तम् ।

नेदिष्ठ पस्पृशु । ते(स)ह्येनत् प्रथमो विदाञ्चकार ब्रह्मेति ॥ २ ॥
तस्माद्वा इन्द्रोऽतितरामिवान्यान् देवान् । स ह्येनन्नेदिष्ठं पस्पर्श ।
स ह्येनत् प्रथमो विदाञ्चकार ब्रह्मेति ॥ ३ ॥
तस्यैष आदेशो यदेतद्विद्युतो व्यद्युतदा इति, इन्न्यमिप

यदग्निर्वायुरिन्द्र । ते ह्येतन्नेदिष्ठं पस्पृशु । ते ह्येनत् प्रथमो विदाञ्चकार ब्रह्मेति'—तस्मादेव हेतो एत एवाग्निवाय्विन्द्रा इतरान् देवान् अतितेरत इव । इवशब्द एवार्थ । अतितेरत एवेत्यर्थ । यस्माद्धेतो नेदिष्ठं-समीपे वर्तमान तद् ब्रह्म **पस्पृशु**-स्पृष्टवन्त, यतश्च हेतो **प्रथमो विदाञ्चकार** प्रथमास्सन्तो ब्रह्मेति विदाञ्चक्रु, अत एवैते देवान्तरापेक्षया अग्निवाय्विन्द्रा अतिशयित (अतिशय?) वन्त इत्यर्थ । वचनव्यत्ययश्छान्दस । 'तस्माद्वा ब्रह्मेति' । अग्निवाय्विन्द्राणा मध्ये यस्मादिन्द्र सन्निहित ब्रह्म दृष्टवान्, सर्वेभ्य पुरस्तात् पार्वतीमुखात् इद ब्रह्मेति ज्ञातवान्, अत सर्वातिशायीत्यर्थ ।

४ ४-५ 'तस्यैष आदेश' । **तस्य** आविर्भूतस्य सद्यस्तिरोभूतस्य ब्रह्मण **एष आदेश** वक्ष्यमाण उपमानोपदेश इत्यर्थ । 'यदेतद् विद्युतो व्यद्युतदा इति' । यथा विद्युतो विद्योतन क्षणिकम्, तद्वदित्यर्थ ।

---

४ ४ विदितब्रह्मतामर्पीन्द्रादीना सम्यग्दर्शने विसरणे च कारणमथोच्यते । यदेतद्विद्युत इत्यादे शाङ्करव्याख्याने बहु क्लेश । इह विवक्षितयोजना त्वेवम् विद्युत इतीदं षष्ठ्यन्त यदेतदित्यनेनान्वेति। व्यद्युतदा इति, न्यमिषदा इति च विद्युतो यदेतत् द्वयम्, एष आदेश इति । विद्योतवन् निमेषोपि विद्युत एव विवक्षित न तु चक्षुष ; अधिदैवतप्रकरणात् । चक्षुरध्यात्मम् । तथाच प्रकाशतिरो भाव इति भाष्ये विद्युत इति शेष । विद्युत प्रकाशो न्यमिषदित्युक्तौ

(मीमिष)दा इत्यधिदैवतम् ॥ ४ ॥ अथाध्यात्मम् , यदेत(न)द्गच्छतीव च मनो न (मनोऽनेन) चैन(त) दुपस्मरत्यभीक्ष्णं सङ्कल्प ॥ ५ ॥

आ इति प्रसिद्धौ । उपमानान्तरमाह **इन्न्यमि(मीमि)षदा इति ।** अत्रापि आ इत्येतत् पूर्ववत् । इच्छब्द उपमानान्तरसमुच्चयार्थ । यथा **न्यमिषत् (न्यमीमिषत्)** निमेष प्रकाशतिरोभाव क्षणेन, एव ब्रह्मापि तिरोऽभूत् इत्यर्थ । यथा विद्युतस्तिरोहिता भवन्तीत्यर्थ (र्थः)न्यमीमिषदिति वचनव्यत्ययश्छान्दस । **इत्यधिदैवतम् ।** अनात्मभूताकाशादिगतविद्युद्विषय ब्रह्मण उपमानदर्शनमुक्तमित्यर्थ । **अथाध्यात्मम् ।** अनन्तर देहस्थो दृष्टान्त उच्यत इत्यर्थ । **यदेतद् मन ।** एतद् ब्रह्म मनो गच्छतीव । ब्रह्मविषयकमनोगमनमिवेत्यर्थ । यथा मनसो ब्रह्मविषयीकरण न चिरस्थायि, एवमेव यक्षस्य ब्रह्मण प्रकाशोऽपीत्यर्थ । मनसा ब्रह्मविषयीकरण क्षणिकमेव न चिरानुवृत्तमिति दर्शयति **न चैतद्...**

प्रकाशपदाध्याहारो दोष ॥ प्रथमाबहुवचनान्तत्वविवक्षया विद्युत इत्यस्यैव कर्तृपरत्वे त्वाह यथा विद्युतस्तिरोहिता इत्यादि । न्यद्युतदित्यस्याप्युपलक्षणमिदम् । तत्रापि हि वचनव्यत्यय एव । एतद्वाक्यस्यापि विद्युद्विषयकत्वस्पष्टत्वाय अस्य विशिष्य ग्रहणम् । न्यमीमिषदिति स्वार्थ णिजिति शाङ्करम् । अत्र तु किमपि नोक्तम् । ब्राह्मणे तु न्यमिषदिति पाठो दृश्यते । तत्र इत् इत्यपि नास्ति । अर्थ इति प्रथमान्तपाठे 'यथा विद्युत' इत्यत्र यद्वा विद्युत इति स्यात् ।

४ ५ अनवधानमर्थकरणप्रवृत्तशिष्यानुभूतो दृष्टान्त उच्यते अथाध्यात्ममिति । एतद्ब्रह्म मनो गच्छतीवेति । यद्यपि यदेतदित्यस्य पूर्ववाक्य इवात्रापि उपमानपरत्व युक्तम्, न तु एतच्छब्दस्य ब्रह्मपरत्वम् । तथा मनो गच्छतीति मनसो विषयान्तरगमनमपि विव

तद्ध तद्वनं नाम तद्वनमित्युपासितव्यम् । स य एतदेवं वेद, अभि हैनं सर्वाणि भूतानि संवाञ्छन्ति ॥ ६ ॥

सङ्कल्पः—न हि मनोजनितसङ्कल्पो ध्यानविशेष अभीक्ष्णं चिरम् एतद्ब्रह्मोपसरति, न विषयीकरोतीत्यर्थः । ततश्च यथा ब्रह्मणो मनसा विषयीकरणं न चिरानुवृत्तम्, एवं यक्षस्य ब्रह्मणः प्रादुर्भावोऽपि न चिरानुवृत्त । अत्र दृष्टान्तोक्तिव्याजेन ब्रह्मध्यानानुवृत्तिर्दुश्शकेति दर्शितं भवति ।

४. ६ तद्ध तद्वनं नाम ; तद्वनमित्युपासितव्यम् । एतादृश महिमविशिष्टं तत् ब्रह्म सर्वैरपि जनैर्वननीयत्वेन-प्रार्थनीयत्वेन वननामकं भवति । तस्मात् तत् ब्रह्म वनमित्युपासितव्यमित्यर्थः । वनत्वेनोपासनस्य फलमाह स य सवाञ्छन्ति । सर्वैरपि प्रार्थनीयो भवतीत्यर्थः ॥

क्षितु शक्यम् तत्रापि तस्यास्थिरत्वात्—अथापि विषयान्तरापेक्षया प्रकृतब्रह्मग्रहणमेव समगत् वक्तुं साम्प्रतम् । एवमेतच्छब्दस्य ब्रह्म परत्व एव एतद्गच्छतीत्येत्यन्वादेशपाठस्योपपत्ति ब्रह्मण एव प्रागु पात्तत्वादित्याशय ॥ विद्युतो द्योतननिमेषाविव मनसोऽपि गमनतद् भावौ नचैनदिति भाष्यनिर्दिष्टे पाठ एव स्पष्टो भवत । सर्वत्र नचेत्यस्य स्थाने अनेनचेत्येव पाट । क्वचिदच नैवचेति पाठ । अनेन चेति पाठे, अनेन मनोगमनेन सङ्कल्परूपज्ञानमभीक्ष्णमुपसरतीत्यर्थ । मनोगमनाभावे च न स्मरतीति इवेत्यत एव सिद्धम् । एवमुपपादक वाक्यस्यार्थमुक्त्वा उपपाद्यार्थेन सह प्रकृत निगमयति ततद्चेति । एव ब्रह्मण प्रादुर्भूतस्यापि सम्यक्प्रत्यक्षवेद्यत्व न भवतीति दर्शितम् अत्र मनोगमनाभावसिद्धवत्कारात् सिद्धमाह अतेति ॥

४ ६ तद्वनमिति समस्त नामधेय शाङ्करे । तस्य प्राणि जातस्य वननीयमिति । प्रकृतपरामर्शिनस्तच्छब्दस्य नामधेयमध्य

उपनिषदं भो ब्रूहीति ॥ उक्ता त उपनिषत् । ब्राह्मीं वाव त उपनिषदमब्रूमेति ॥ ७ ॥ तस्यै तपो दमः कर्मेति प्रतिष्ठा;

---

४. ७-८ एवम् आत्मना विन्दते वीर्यमित्यर्थे स्थिते सति, वीर्यावाप्तिहेतुभूतभगवदनुग्रहसाधनप्रतिपादिकामुपनिषदं पृच्छति **उपनिषदं भो ब्रूहीति** । इतर आह **उक्ता....**। ब्रह्मप्रतिपादिकां प्रधानोपनिषदमवोचाम । अतः प्रधानोपनिषदुक्तैव । साधनप्रतिपादिकाञ्चोपनिषदं वक्ष्यामि, यदि शुश्रूषसे इति भावः । **तस्यै...प्रतिष्ठा** । तस्यै उक्तायै उपनिषदे । साधनभूतानि कायशोषणलक्षणं तपः, इन्द्रियनिग्रहरूप उपशमः, अग्निहोत्रादिलक्षणं कर्म चोपनिषच्छब्दिताया ब्रह्मविद्यायाः

निवेशोऽनौचित्यात् वनमित्येव नामोक्तमिह । तद्वेत्यत्र तत्पदमेतादृशमहिमविशिष्टमित्यर्थकम्, एतादृशमहिमविशिष्टत्वादित्यर्थकं वा ।

४. ७. इतर आहेति । अयं भावः—किम् आख्यायिकां फलार्थवनत्वोपासनञ्च श्रुत्वा, 'ईदृशं नापेक्षितम्, किंतु मोक्षार्थब्रह्मविद्योपदेश एव' इत्याशयेन उपनिषदं ब्रूहीति पृच्छ्यते, किं वा ब्रह्मविद्यासाधनोपनिषज्जिज्ञासया? नाद्यः, आरम्भ एव श्रोत्रस्य श्रोत्रमिति मन्त्रेण ब्रह्मोपासनविशेषस्योक्तत्वात्, उपपादितत्वाच्च । अन्त्ये पुनः उच्यते, श्रूयताम्—केवलश्रवणादिमात्रं न कार्यकरम्, किन्तु अधीतस्वाध्यायाधीनतपःपर्यन्तसाध्यविद्याविशेष इति ।

४. ७-८. एवमाख्यायिकादिकथनं यदर्थम्, तदेतावता प्रदर्शितम् । एवं भगवदनुग्रहस्यैव मुख्यत्वेऽपि सर्वेषु तदनुग्रहादर्शनात् तत्कारणमप्यावश्यकमिति शिष्य एवं पप्रच्छ । साधनभूतानीत्यस्य वेदादि सत्यान्तेष्वन्वयः । 'दमशम' इत्युभयनिर्देशे दमशब्दार्थसंकोचेऽपि अत्र शमोऽपि इन्द्रियनिग्रहत्वेन रूपेण दमशब्दार्थ इत्याशयेनाऽऽह उपशम इति । साधनमध्ये तपआदीनां प्रतिष्ठात्वम् ।

वेदाः सर्वाङ्गानि सत्यमायतनम् ॥ ८ ॥ यो वा एतामेवं वेद, अपहत्य पाप्मानमनन्ते स्वर्गे लोके ज्येये प्रतितिष्ठति प्रतितिष्ठति ॥९॥

इति चतुर्थः खण्डः

इति सामवेदीयतलवकारोपनिषत् ।

प्रतिष्ठा दार्ढ्यहेतु । वेदाः आयतनम्—षडङ्गसहिताश्च वेदाः सत्यवदनञ्च ब्रह्मविद्योत्पत्तिकारणमित्यर्थ ॥

४. ९. **यो वा एतामेव वेद**—एतां ब्रह्मविद्यामुक्तविध-प्रतिष्ठायतनोपेतां यो वेद, **अपहत्य प्रतितिष्ठति**-स सर्वाणि पापानि विधूय कालपरिच्छेदशून्ये ज्येये ज्यायसि ज्येष्ठे सर्वोत्तरे **स्वर्गे लोके** वैकुण्ठे लोके प्रतिष्ठितो भवतीत्यर्थ । अनन्तज्येयपदसमभिव्याहारात् **स्वर्गलोकशब्दो** भगवल्लोकपर ॥

क्षेमाय यः करुणया क्षितिनिर्जराणां भूमावजृम्भयत भाष्यसुधामुदार· । वामागमाध्वगवदावदतूलवातो रामानुजस्स मुनिराद्रियतां मदुक्तिम् ॥

इति श्रीमत्तातयार्यचरणारविन्दचञ्चरीकस्य वात्स्यानन्तार्यपादसेवा-समधिगतशारीरकमीमांसाभाष्यहृदयस्य परकालमुनिपादसेवासमधिगत पारमहंस्यस्य **श्रीरङ्गरामानुजमुनेः कृतिषु केनोपनिषद्भाष्यम् ।**

वेदादीनाञ्चाऽऽयतनत्वं विद्योत्पादकत्वरूपम् । तथाच सत्यादिरूपे ब्रह्मचर्यनियमे स्थित्वा अङ्गान्यधीत्य व्युत्पत्तिं संपाद्य कर्मब्रह्मरूप-वेदार्थं निश्चित्य निष्कामकर्मानुतिष्ठन् इन्द्रियाणि नियम्य तपश्चरणेन दर्शनसमानाकारब्रह्मविद्यां निष्पादयेदिति भावः । अत्रोत्तरोत्तर-भाविन· पूर्वं पूर्वं निर्देशः तप इत्यादिना ।

४. ९. अमृता भवन्तीति प्रागुक्तं फलमेव विवृणोति यो वा इति ॥

इतिश्रीवात्स्यवीरराघवाचार्यकृतिषु केनोपनिषद्भाष्यपरिष्कार ॥

शुभमस्तु

केनोपनिषदर्थसंग्रहः ।

१. पूर्णोपास्यात् परोऽनन्तो वागादीनामगोचरः ।
देवस्तेषां नियन्तेति ब्रह्म विज्ञाय मुच्यते ॥
२. कात्स्न्र्येनावेद्यमप्येतद्विदित्वेह यथायथम् ।
तत्प्रसादात्तशक्तिस्सन् विद्यया विन्दतेऽमृतम् ॥
३. अग्निवाय्विन्द्रमुख्यैस्तदपि त्रैलोक्यदैवतैः ।
अवेद्यमखिलेशानमनुग्रहपरं सताम् ॥
४. विद्युद्वत् क्षणभानं तद्वनं स्थैर्येण वेदितुम् ।
शिष्यन्ते सत्यमङ्गानि वेदाः कर्म दमस्तपः ॥
५. इत्थं तलवकारोपनिषत्खण्डचतुष्टये ।
वशीचिकीर्षुर्वर्गादि मुमुक्षुः प्रतिबोधितः ॥

सभाष्यटिप्पण केनोपनिषद्विषयसूचि ।

मनआदिप्रज्ञकनियन्तृदेवविषयः शिष्यप्रश्नः	पु. ३
गुरुप्रतिवचनारम्भः ४ तादृशदेवज्ञानस्य मोक्षहेतुत्वम्	५
उक्तकरणैरगम्यत्वेनैव तस्य ज्ञेयत्वम्	६
ब्रह्मण उक्तकरणागम्यत्व-करणहेतुत्वे	७
यदिदमुपासत इत्यस्य श्रुतप्रकाशिकोक्तार्थः	,,
समन्वयाधिकरण श्रीभाष्यसूक्तिः	,,
ब्रह्मण ईषदेव वेद्यत्वसंभवः	९
ब्रह्मणः कृत्स्नज्ञानमानिनामज्ञत्वम्	१०
यस्यामतमित्यादेः श्रीभाष्योक्तार्थः	११
यथोचितज्ञानेपि ब्रह्मानुग्रहान्मोक्षसिद्धिः	१२
इहैव तस्यावश्यवेद्यत्वम्	,,
ब्रह्मणो दुर्गमत्वानुग्रहपरत्वादिख्यापनाय यक्षब्रह्मोपाख्यानम्	१३
प्रादुर्भूतयक्षविज्ञाने देवप्रेरितस्य अग्नेरशक्तिः परिभवश्च	१४
तथा ,, वायोः ,,	,,

इन्द्रस्याऽऽगमने यक्षतिरोधानम्	१५
इन्द्रेण उमामुखात् यक्षस्य ब्रह्मत्वावगम	१६
ब्रह्मज्ञानस्य विद्युन्मनोगतितुल्यता	१७ १८
ब्रह्मणो वननीयत्वम् वनशब्दवाच्यत्वम्	१९
ब्रह्माधिगमोपायपट्कम् ब्रह्मविद उत्तमस्वर्ग प्रतिष्ठा	,,

केनोपनिषद्भाष्यप्रमाणाकरः

६	१४	यतो वाच विरुद्ध्येत	श्रीभाष्यजिज्ञासा-श्रुतिघट्ट	
,,	,,	यतोवाचोनिवर्तन्ते	तैत्तिरीय-आनन्दवल्ली	९
,,	१८	ब्रह्मविदाप्नोतिपरम्	,, ,,	१
,,	१९	तमेवविदित्वा	श्वेताश्व उ	३
७	९	सनोदेव	तै नारायण—	१०-१९
,,	१४	असन्नेव स	तै आनन्दव—	६

केनोपनिषन्मन्त्रसूची

	पु		पु
अन्यदेव तत् १४	७	यच्छ्रोत्रेण १८	८
इह चेदवेदीत् २५	१२	यत् प्राणेन १९	८
केनेषितम् ११	३	यदि मन्यसे २१	९
न तत्र १३	६	यद्वाचा १५	७
नाहं मन्ये २२	१०	यन्मनसा १६	९
प्रतिबोध २४	११	यस्यामत २३	१०
यच्चक्षुषा १७	८	श्रोत्रस्य १२	४

अपूर्वपदानि—अतिमुच्य १-२ अधि १-४ नन्निबोध २-४

यक्षम् ३-२ वनम् ४ ६